## दशमः पाठः

# वसुधैव कुटुम्बकम्

**'वसुधैव कुटुम्बकम्' इति अंशः प्राचीनकालतः महत्त्वमावहति। वैश्विककरणस्य विकासे समत्वभावनायाः महती आवश्यकता वर्तते। स्वार्थपरित्यागेन परार्थचिन्तनेन च भावनेयं रक्षिता वर्धिता च भवति। प्रस्तुतनिबन्धः विषयेऽस्मिन् प्रकाशं प्रददाति।**

**'वसुधैव कुटुम्बकम्' इत्यवधारणा भारतीयानामस्माकं वैशिष्ट्यम्। एषो महान् सन्देशः संसारे भारतान्निःसृतोऽस्ति।**

प्राचीनकालादारभ्य सर्वभूतहितसाधनं मानवस्य परमं लक्ष्यमस्ति। तत्र राष्ट्रदेशादिभेदो विपज्जनक इत्येव मन्तव्यः। यदा स्वार्थबुद्धिर्हीयते तदैव देवत्वं जागर्ति। वेदेषु प्रतिपादितयज्ञप्रक्रियाया इदमेव महत्त्वम्। एतदेव यज्ञप्रक्रियायां 'स्वाहा' (स्व-आ, हा, स्वार्थस्य सर्वथा त्यागः), 'इदं न मम' इत्यादिभिः पदैर्निर्दिश्यते। तथा च स्वार्थपरिहारपूर्वकं परार्थसाधनं शिक्ष्यते।

निजत्व-परत्वभावकल्पनन्तु अल्पधियामेव सम्मतम्। ते ममेदम्, परकीयम् एतद् इति विभेदबुद्ध्या कार्याणि साधयन्ति। परं ज्ञानिनस्तत्त्वदर्शिनश्च समत्वबुद्धिम् आधृत्य विश्वहितचिन्तने सर्वलोककल्याणसम्पादने च प्रवर्तन्ते। अत एव हितोपदेशे साधूक्तम् -

**अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**

परहितनाशनं परार्थनाशनं वा न केवलं दोषायैव अपितु अपकर्तुरपि विनाशं साधयति। यतः दुष्कृतं दुष्कृतं सुकृतं सुकृतञ्च जनयति। एवमेव कलहः कलहस्य, विद्वेषः विद्वेषस्य विरोधः विरोधस्य च जनने कारणं भवति। तथैव स्नेहः स्नेहम्, सद्भावः सद्भावं सहानुभूतिः सहानुभूतिञ्च वर्धयति। अतः सामाजिकं राष्ट्रियम् अन्ताराष्ट्रियं वा कार्यं यदि सहानुभूति-विश्वासमूलकं तर्हि तत् सुखदं समृद्धिकारि लोकहितकारि च सम्पद्यते।

विश्वधर्मभावना विश्वकल्याणमूला वर्तते। 'कृण्वन्तो विश्वमार्यम्' इति वदतो वेदस्याप्येतदेवाभिमतम्। सर्वेषां धर्माणां सारभूततत्त्वानां सङ्ग्रहेण विश्वधर्मत्वं सम्भवति। उच्यते च

**''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्''।।**

इत्यस्याप्येष एवाभिप्रायः यत् वसुधायां सर्वेऽपि जनाः सुखेन रोगराहित्येन च भद्रं पश्यन्तः भवेयुः। यतो हि परहिताश्रयणं विश्वबन्धुत्वं च मानवं देवत्वं प्रापयति। जीवने देवत्वप्राप्तिकामनायै च वसुधैव कुटुम्बकम् आश्रयणीयं व्यवहरणीयञ्च।

### शब्दार्थः

| | | |
|---|---|---|
| सर्वभूतहितसाधनम् | - | सम्पूर्णस्य विश्वस्य कल्याणम् (सम्पूर्ण विश्व का कल्याण करना) |
| लक्ष्यम् | - | उद्देश्यम् |
| विपज्जनकः | - | सङ्कटजनकः (सङ्कट को उत्पन्न करने वाला) |
| मन्तव्यः | - | चिन्तनीयः (मानना चाहिए) |
| स्वार्थबुद्धिः | - | अल्पबुद्धिः / स्वकीयबुद्धिः |

| | | |
|---|---|---|
| हीयते | – | नष्टा भवति (नष्ट होती है) |
| परार्थसाधनम् | – | परोपकार: (दूसरों का उपकार करना) |
| अल्पधियाम् | – | अल्पबुद्धिमताम् (छोटी बुद्धि वालों का) |
| तत्त्वदर्शिन: | – | ज्ञानिन: (ज्ञान युक्त जन) |
| निज: | – | स्वकीय: (अपना) |
| लघुचेतसाम् | – | संकुचितमानसिकतावताम् (छोटी बुद्धि वालों का) |
| उदारचरितानाम् | – | उदारहृदयानाम् (बड़ी सोच वालों के लिए) |
| वसुधैव | – | भूमि एव |
| कुटुम्बकम् | – | परिवार: |
| अपकर्तु: | – | दुष्कर्तु: (गलत करने वाले का) |
| कृण्वन्त: | – | कुर्वन्तु (करें) |
| निरामया: | – | रोगरहिता: (रोगविमुक्त) |
| भद्राणि | – | समीचीनानि (अच्छा) |
| दु:खभाग् | – | दु:खग्रस्त: (दु:ख से ग्रस्त) |

## अभ्यास:

**1. एकपदेन उत्तरत–**

(क) सर्वभूतहितसाधनं कस्य लक्ष्यमस्ति?

(ख) अयं निज: परो वेति भावना केषां भवति?

(ग) परहितनाशनं कस्य विनाशं साधयति?

(घ) विश्वधर्मभावनाया: मूलं किम्?

(ङ) सहानुभूति: किं वर्धयति?

**2 एकवाक्येन उत्तरत–**

(क) 'स्वाहा' इत्यस्य क: अर्थ:?

(ख) ज्ञानिनस्तत्त्वदर्शिनश्च कुत्र प्रवर्तन्ते?

(ग) दुष्कृतं किं जनयति?

(घ) विश्वधर्मत्वं कथं सम्भवति?

**3 त्रिचतुर्भिर्वाक्यै: उत्तरत–**

(क) वेदेषु स्वार्थबुद्धित्यागस्य कानि उदाहरणानि दृश्यन्ते?

(ख) सामाजिकं कार्यं कथं लोकहितकारि सम्पद्यते?

(ग) अयं निज: परो वेति भावनाया: परिष्कार: कथं कर्तुं शक्यते?

(घ) वसुधायां सर्वेऽपि जना: कीदृशा: भवेयु:?

(ङ) विश्वधर्मभावना विश्वकल्याणमूला कथं सम्भवति?

**4. उचितं मेलयत**

| | (अ) | (ब) |
|---|---|---|
| (क) | राष्ट्रदेशादिभेद: | विश्वकल्याणमूला |
| (ख) | अयं निज: | सर्वे सन्तु निरामया: |
| (ग) | परहितनाशनम् | विपज्जनक: |
| (घ) | विश्वधर्मभावना | परो वेति |
| (ङ) | सर्वे भवन्तु सुखिन: | परार्थनाशनम् |

**5. रिक्तस्थानानि पूरयत–**

(क) सर्वभूतहितसाधनं....................परमं लक्ष्यमस्ति।

(ख) निजत्व–परत्वभावकल्पनन्तु ................सम्मतम्।

(ग) .............तु वसुधैव कुटुम्बकम्।

(घ) ...................इति वदतो वेदस्याप्येतदेवाभिमतम्।

(ङ) सर्वे सन्तु................।

**6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत–**

(क) इत्येव

(ख) ममेदम्

(ग) वसुधैव

(घ) अपकर्तुरपि

(ङ) एवाभिप्राय:

(च) साधूक्तम्

**7. नामोल्लेखपूर्वकं समासविग्रहं कुरुत–**

(क) लघुचेतसाम्

(ख) स्वार्थबुद्धि:

(ग) उदारचरितानाम्

(घ) रोगराहित्येन

(ङ) यज्ञप्रक्रियायाम्

**8. अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनञ्च लिखत–**

| | | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|---|
| (क) | मानवस्य | --------- | --------- | --------- |
| (ख) | वेदेषु | --------- | --------- | --------- |
| (ग) | मम | --------- | --------- | --------- |
| (घ) | इदम् | --------- | --------- | --------- |
| (ङ) | अयम् | --------- | --------- | --------- |

| | | | | |
|---|---|---|---|---|
| (छ) | वसुधायाम् | ---------- | ---------- | ---------- |
| (ज) | भद्राणि | ---------- | ---------- | ---------- |
| (झ) | जनाः | ---------- | ---------- | ---------- |
| (ञ्) | धर्माणाम् | ---------- | ---------- | ---------- |

**9. अधोलिखितपदानां धातुं लकारं पुरुषं वचनं च लिखत-**

| | | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | अस्ति | --------- | ---------- | ---------- | ---------- |
| (ख) | जागर्ति | --------- | ---------- | ---------- | ---------- |
| (ग) | प्रवर्तन्ते | --------- | ---------- | ---------- | ---------- |
| (घ) | साधयति | --------- | ---------- | ---------- | ---------- |
| (ङ) | जनयति | --------- | ---------- | ---------- | ---------- |
| (च) | वर्धयति | --------- | ---------- | ---------- | ---------- |
| (छ) | वर्तते | --------- | ---------- | ---------- | ---------- |
| (ज) | भवेयुः | --------- | ---------- | ---------- | ---------- |
| (झ) | प्रापयति | --------- | ---------- | ---------- | ---------- |
| (ञ) | सम्पद्यते | --------- | ---------- | ---------- | ---------- |

**10. अधोलिखितपदानां पर्यायपदानि लिखत-**

(क) वसुधा

(ख) बुद्धिः

(ग) विद्वेषः

(घ) अभिप्रायः

(ङ) मानवः

## योग्यताविस्तारः -

निबन्धान् लिखत -

- धेनोः वैशिष्ट्यम्
- विज्ञानम्
- भारतीयाः वैज्ञानिकाः